काव्यमालिका

(संस्कृतकवितासंग्रहः)

रचयिता :

श्री परड्डी मल्लिकार्जुनः

જન્મ સ્થળ - સવડી (ધારવાડ
જિલ્લા)
જન્મ તારીખ 6.3.1955
પિતાશ્રી શ્રી ખીમરાજ ખરડુ
માતુશ્રી હંકુબાઈ ખરડુ

काव्यमालिका

(संस्कृतकवितासंग्रहः)

रचयिता :

श्री परड्डी मल्लिकार्जुनः

KAVYAMALIKA, A Collection of Sanskrit Poems by Paraddi Mallikarjun.

प्रकाशकरू:

श्री परड्डी मल्लिकार्जुनः
संस्कृत-विभाग,
कर्नाटक विश्वविद्यालय,
धारवाड-५८०००३.

सर्वेऽधिकाराः स्वायत्ताः ।

प्रथमं मुद्रणम् : डिसंबर १९७७

मूल्यं : रूप्यकत्रयम् ।

मुद्रक :

सदानन्द प्रिंटर्स, धारवाड-५८०००१.

स्वान्तःसुखाय रचिता : कविता मदीयाः
काश्चित्क्वचित् प्रकटिताः पठिता अपि स्युः।
संगृह्य ताः पुनरहं प्रकटीकरोमि
नन्दन्तु पाठकवरा रसिका यदि स्युः ॥

विषयानुक्रमणिका

१.	किमिदं संस्कृतं नाम ?	१
२.	गीयतां स्नानमन्दिरे	२
३.	सुकवे मौनमाश्रय	३
४.	नेतिक्रमोऽत्रमहताम्	४
५.	वयमुत्तरकुमारश्च	६
६.	परीक्षामौल्यमापनम्	७
७.	छात्राणामंकुशः कुतः	८
८.	सन्दर्शनप्रसङ्गस्वारस्यम्	१०
९.	शून्यसंप्राप्तिरस्माकम्	११
१०.	कामिनीकायकल्पः	१२
११.	अयस्कान्ता	१३
१२.	स्त्रीसमानताष्टकम्	१४
१३.	देववाणी विजयताम्	१५
१४.	महात्मा मार्गदर्शकः	१६
१५.	मांसमश्नाति वै गजः	१७
१६.	येषां केषां भवेत् सभा	१८
१७.	वन्दे कविगुरुं सदा	२३
१८.	वाल्मीकिः	२४
१९.	नाचिकेतकथामृतंः—	
	प्रथमः सर्गः	२
	द्वितीयः सर्गः	५
	तृतीयः सर्गः	८
	चतुर्थः सर्गः	१२
	पंचमः सर्गः	१६

किमिदं संस्कृतं नाम ?

कस्मिन् प्रयुज्यते देशे वाणीयं संस्कृताभिधा ।
इंग्लेण्डदेशजां वा तां जानीमो ग्रीससम्भवाम् ॥

शेक्सपीयर् तथा गैटे होमर् कविगणः श्रुतः ।
केषां राष्ट्रकविः सोऽयं कालिदासाभिधानवान् ॥

राजदूतैर्यदा प्रोक्तमस्मद्देशाद् गतैरिदम् ।
भारतीयैः कथं चान्यैर्ज्ञायतां सुरभारती ? ॥

जर्मनीसम्भवः कोऽपि वदत्यस्मान् दयापरः ।
संस्कृतं नाम दैवी वाक् हिन्दूसंस्कृतिभूषिणी ॥

सन्मार्गदां स्वजननीं विस्मृत्याघनिवारिणीम् ।
दासी स्वार्थपरास्माभिर्मन्यते हितकारिणी ॥

परेषां काचमालोक्य हन्त विस्मितचेतसाम् ।
विदेशे लब्धमूल्येन रत्नेनानन्दशून्यता ॥

गीयतां स्नानमन्दिरे

स्नानागारे विमलमतिना गीयते यत्तु गानं,
सर्वारोग्यप्रमुखकरणं चेति विज्ञानिसूक्तिः ।
स्वेच्छाचारात् प्रकृतिसरलैः गीयते मानवैर्यत्
सर्वे व्याघ्रप्रमुखपशवो निर्जितास्तेन मन्ये ॥

न रागो नैव तालोऽपि न च वर्णविशुद्धता ।
सर्वतन्त्रस्वतन्त्रस्य नादब्रह्मसमाधिता ॥

यदा स्नानगृहे मर्त्यो गानलोलो भविष्यति ।
तदा चामरताभावे रोगबाधा विनश्यति ॥

गानलोलैर्महान् शब्दो जायते हानिकारकः ।
नेयं शंका न बाधेत सरागाः सन्तु सर्वशः ॥

स्नानप्रवृत्ते प्रतिभाविशिष्टे मैकासुरोऽप्येति पराजयं यत् ।
तस्माद् बुद्धैः सर्वजनीनमुत्सवे स्नानादिसङ्गीतमपेक्षणीयम्॥

सुकवे ! मौनमाश्रय

'न पीयते काव्यरसः पिपासितैः'
पुरा प्रयुक्ता विदुषेयमुक्तिः ।
'न चंद्रलोकं प्रति नीयते नरः
काव्येन ! किं तेन' नवीनयुक्तिः ॥ १ ॥

यशसा काव्ययोगेन मृतः प्राप्नोति किं यदि ।
कारादिवाहनेष्वत्र सचारमपि नो भवेत् । ॥ २ ॥

लक्ष्मीः सरस्वती वापि ह्येका पुरुषमाश्रिता ।
द्वयमेकस्थलीवार्ति युगपन्न भवेद्यतः ॥ ३ ॥

शारदा दूरतः त्याज्या लक्ष्मीकटाक्षकांक्षिणा ।
कस्मै वा रोचते काव्य धनचिन्ताजडे जने ॥ ४ ॥

समस्या प्रमुखा येषां वराकोदरपूरणम् ।
कथं जानन्ति तेऽ शक्ताः 'काव्यं सन्तोषकारणम्' ॥ ५ ॥

ते राजानः परमरसिकाः सत्कलारक्तचित्ता :
यातास्चास्तं तव कवितया को भवेत् हृष्टचित्तः ।
विज्ञानं नः परममधुना दैवतं तांत्रिकं यत्
काव्यग्रंथान् पठति कुमतिर्योऽपि वा कोऽपि यावत् ॥ ६ ॥

वैद्यो वा भव विज्ञानी कृषकः कार्मिकोऽभयः ।
जीविकाप्राप्तिकांक्षा चेत्, सुकवे, ! मौनमाश्रय ॥ ७ ॥

नेतिक्रमोऽत्रमहताम् ।

ब्रह्मजिज्ञासुभिः प्रायो नेतिक्रम उपाश्रितः ।
ब्रह्मस्वरूपचर्चायामव्यक्तज्ञानमीदृशम् ॥

नायं पक्षी न वा प्राणी न चापि मानवः क्वचित् ।
नेतिक्रमविशिष्टं तु परमात्मेति विदुर्बुधाः ॥

अस्माकं स्वामिनः केचिद् राजकारणरागिणः ।
नेतिक्रमवशेनैव सूचयन्ति निजाशयम् ॥

स्वामिनं गृहमायातं प्रांजलिर्वीक्ष्य भक्तिमान् ।
पृष्टवान् 'भगवन् देयं मया किं पेयमुच्यताम् ॥

फांटां वाञ्छति वा कोलां रसनिम्बफलस्य वा ।
'शरबत्' नामकं पेयं किं वा देयं मया प्रभो' ॥

नेत्युक्तस्तेन संसारी स्वामिना भवरोगिणाम् ।
वैद्येनाद्भुतलीलेन विनीत इदमुक्तवान् ॥

"सोडापूर्वा तु विस्कि किं ददानि स्वामिपुङ्गव"
ततः काषायवस्त्रेण सोडावर्जा हि सेप्सिता ॥

कदाचित् राजनीतिज्ञः एम्.एल.ए. पदभूषितः ।
शुभ्रखादीमयः पौरैः पृच्छ्यते श्रान्तिवारणे ॥

वीरं पिबति वा ब्राण्डीं भगवान् सोडाविवर्जिताम् ।
ततस्तेनाप्रमेयेण नेत्युक्तिं प्राप्य ते पुनः ॥

विस्कीं तु परदेशीयां यदा यच्छन्ति मानिने ।
परब्रह्मस्वरूपां तां मुमोद प्राप्य नायकः ॥

वयमुत्तरकुमारश्च

बालासमक्षं प्रसभं प्रशस्य
स्वीयं प्रतापं स्मितमण्डितास्याः ।
तथैव वीरा अभिरक्षणीयाः
प्रयोगकाले सति विक्रियास्याः ॥

सर्पं समीक्ष्यात्महिताय धावन्
भार्याहतं वीक्ष्य समागतासुः ।
सर्पे मृते ताडनकार्यमग्नः
पतिः प्रतापीति जगत्प्रसिद्धः ॥

रम्यां कुमारीं प्रति भीमकायो
वदन् स्वकं पौरुषमात्मशंसी ।
मृगालये सुप्तमृगाधिराजं
कृशं समीक्ष्यैव पलायतेऽसौ ॥

कांचिद्वयस्यामतिधैर्यशाली
प्रलोभयन् भीरुमतीवमुग्धाम् ।
रात्रौ नयन् देशमतिप्रशान्तं
समीक्ष्य मार्जारमितो ह्यधावत् ॥

चीनादिदेशाक्रमणं समीक्ष्य
नेता भवेद्रक्तविलोचनस्तदा ।
वेद्यां स्थितो भाषितमैकराक्षसः
गर्जन् वदेत् प्रेक्ष्य जनं सकोपम् ॥

सिंहं प्रसुप्तं तु विवेकहीनः
उत्थापयेदात्मविनाशकांक्षी ।
गुंफं यमस्यापि मुमूर्षुरेषः
कर्षेद् विना कारणमप्रबुद्धः ॥

वीक्ष्यास्मान् भाषणे वीरान्
श्मश्रूपरमशोभनान् ।
स्मेराननो भवेन्नूनं
उत्तरोऽपि रणप्रियः ॥

" परीक्षामौल्यमापनम् "

यदिष्टं लिख्यते छात्रैः पृष्टं नैव कदाचन ।
सफलोऽस्तु श्रमोऽस्माकं शिष्यप्रतिभयैतया ।।

पृष्टं यैर्लिख्यते छात्रैस्ते पुनर्मन्दबुद्धयः ।
लेखितं शिक्षकैः सर्वे कण्ठस्थीक्रियते हि तैः ।।

पुरुषीक्रियते नारी छात्रैर्विज्ञानपारगैः ।
बहव एकत्र दृश्यन्ते तैरेवाध्यात्मपुङ्गवैः ।।

अश्वस्तु याति ह्रस्वत्वं ह्रास्यं यास्यति चास्यताम् ।
अपि दुर्योधनः शब्दो भवेद् धुर्योदनः क्वचित् ।
रसायनक्रिया "स्थानपल्लटः" तैरुदाहृता ।।

पुराणज्ञानसम्पन्नः संमोहयति नः क्वचित् ।
भारतैतिह्यानिर्माणे कोऽतिरिच्येत तं पुनः ।।

अस्मत्कारुण्यविश्रंभाद् राजकारणरागिणः ।
परिश्रमरताः सर्वे छात्राः सत्यग्रहादिषु ।।

मौल्यमापनतः श्रान्तैर्लब्धं यच्चित्तरंजनम् ।,
चलच्चित्रादियोगेऽपि न लभ्यं व्ययकारिणि ।।

ये छात्रवर्या अधुना परीक्ष्याः
त एवमाचार्यपदप्ररूढाः ।
भूत्वा परीक्षाकरणे नियुक्ता
शिक्षोन्नतिं कर्तुमितः प्रवृत्ताः ।।

छात्राणामंकुशः कुतः

अहो विद्यार्थिचातुर्यं ज्ञायन्ते येन पूर्णतः ।
विषयाण्येव सर्वाणि परिक्षाविषयादृते ॥ १ ॥

राज्ञां पुत्रा अपि गुरुजनव्यक्तभक्त्यादयस्ते
विद्यायोगप्रतिहितधियश्चेति शंकास्मदीया ।
मत्वाशक्तं विनतपुरुषं छात्रवेषा हि केचित्
आचार्याणां परमगुरवश्चाग्रणीमाननीयाः ॥ २ ॥

कुशला व्यवहारेऽपि केचिन्नायकबुद्धयः ।
धर्मसंकीर्तनं छात्र-वृतिमात्रे हि कुर्वते ॥ ३ ॥

विवाहपूर्वेऽपि सदारलोक-
मतिक्रमन्त्यः कति शिष्यलीलाः ।
गुरुप्रयुक्तोत्तमहास्यमूका
आविष्कृतात्मीयसमाजशीलाः ॥ ४ ॥

परिक्षानियमादीनां ज्ञाने यस्तु परिश्रमः ।
पालकास्तं प्रशंसन्ति स्वपाठाध्ययनं श्रमः ॥ ५ ॥

अस्मिन् दुराग्रहमये समये ऽपि छात्रा
"आवश्यकी भवतु मा विषमा परीक्षा"
इत्थं सदाग्रहमया यदि सन्ति शिक्षा-
दक्षैस्तथैव क्रियते किमु तत्र चित्रम् ॥ ६ ॥

चलच्चित्रादिसंकीर्णपाठ्येतरक्रियारतैः ।
लभ्यन्ते वा पदाघातसुखनि मृगयापरैः ॥ ७ ॥

भीता छात्रगणादियं सुरगणं दैवी गता भारती
भाषा याङ्ग्लजनस्य सा ऽपि गमिता दैन्यं परं भारते ।
आचार्या अनुभूतशिष्यमहिमा मौनं श्रिताः कः पुनः
छात्राणामुपदेशकार्यकुशली ? यावत् स्वतन्त्रो जनः ॥ ८ ॥

सन्दर्शनप्रसङ्गस्वारस्यम् ।

सन्दर्शनादिवेलायां स्वारस्यं दृश्यतेऽद्भुतम् ।
कविगुरुः कालिदासोऽपि वक्तुं शक्नोति नाधुना ॥

सन्दर्शनार्थं विविधो विचित्र-
वेषान्विताभ्यर्थिगणोऽत्र यातः ।
विभिन्नभाषाविषयप्रवीणः
सन्दर्शकैरेवमितः परीक्ष्यः ॥

एका संवादमालिका-
कालिदासः कविः कोऽयं ? जर्मनीदेशसम्भवः ।
वाल्मीकेरस्ति काव्यं किं ? गयटे एव महान् कविः ॥

अपरात्रैव-
गङ्गानदी कुत्र समुद्भवेयं
मास्कोनगर्याँ तु विशालदेशे ।
बुद्धेन को धर्मविधिः प्रयुक्तः
वेदानधीत्यैव मनुष्यमुक्तिः ॥

अपरस्तीक्ष्णबुद्धिस्तु स्फूर्तिमान् केरलं तदा ।
चैनादेशनिवासिभ्यो ददौ वा चेति का गतिः ॥

कश्चित् तदा मन्दमतिः परीक्ष्यः
ब्रवीति सत्यं निजमूढतायाः ।
वैदुष्यमाविष्क्रियतेऽन्यछात्रैः
नवीनरीतिप्रतिभाविशेषात् ॥

घजनीमहमदस्यापि भारतीकरणं कृतम् ।
नूतनादर्शयुक्तैस्तु छात्रैरौदार्यशालिभिः ॥
पुराणैतिह्यनिर्माणे कोऽतिरिच्येत तान् पुनः ।
साहित्यादिकलासृष्टौ छात्रवर्यान् बहुश्रुतान् ॥

शून्यसंप्राप्तिरस्माकम् ।

बुद्धानुयायिनः सन्तः शरणा अपि केचन ।
शून्यसंप्राप्तिमिच्छन्ति नानायत्नरताः सदा ॥

सर्वकाराधिकारे ये स्थिता दक्षा विरागिणः ।
तानेवानुसरन्तोऽद्य शून्यसंपादने रताः ॥

अपरिग्रहदक्षैस्तैः सत्पात्रेभ्योऽखिलं धनम् ।
दीयते परमप्राप्तिनिमित्तं श्रद्धयान्वितैः ॥

कन्ट्रयाक्टरैः सार्वजनीनसंपदैः
यद्गृह्यते तच्छरणप्रदत्तम् ।
अनुग्रहप्रत्यभिनन्दिभिस्तैः
(अध्यात्मसिद्धा जगति प्रसिद्धाः ।)
कृताः शरण्याश्च सतां वरेण्याः ॥

"जनानां सर्वकारेण यद्धनं गृह्यतेऽखिलम् ।
कररूपेण तत्सर्वं व्यर्थं हि कृतमेव तत्" ॥

मा भूत् शंका जतस्येति, रक्षितव्या परम्परा ।
अस्मदीयो महान् देशो यतो जगति कीर्तितः ॥

कुटुम्बयोजना देशे योजना पञ्चवार्षिकी ।
शून्यसंपादनप्राप्तौ साधने फलदायिनी ॥

कामिनीकायकल्प : ।

कृशाङ्गी भवितुं प्रायः तन्वीयं यत्नमास्थिता ।
विमुखाहारभोगेषु कायकष्टादिसङ्गता ॥

वर्णिता कविभिर्भामा कृशमध्या सुमध्यमा ।
बाहुवल्ली सुबिम्बोष्ठा मृगीवायतलोचना ॥

काव्यकन्यास्वरूपं यद्दृष्टुं प्रत्यक्षतो भयः ।
उपमाद्रव्यमालोच्य विज्ञानी भ्रान्तमानसः ॥

मन्दाक्रान्ता हिमकरमुखी कुंभचक्रादियोगात्
मध्ये लीना सरलमनसा विश्वसन्ती नृवाक्यम् ।
तद्वद् भूत्वा पुरुषहृदयं कर्षति स्वल्पखाद्या
त्यक्तं भुक्त्वा पुरुषहतको पीनकायस्तयाऽभूत् ॥

पुरुषाणां धूर्ततां दृष्ट्वा महिला जाग्रताऽधुना ।
स्पर्धायां निरता तेन नूनमात्महिते रता ॥

कति यूरोपिदेशीया नार्यः पुरुषमानिनः ।
पराजेतुं कृताभ्यासा पौष्टिकाहारभक्षणे ॥

यदा नारी भवेत्पीना कृशता नरमेष्यति ।
चाटुभिर्नैव शक्नोति धर्षितुं चाकृशोदरीम् ॥

इत्थं कृशाङ्गी कृतकायकल्पा
भवेत्सुपुष्टा धृतभोगनिष्ठा ।
मज्नूवदेनां मनुते च लैलां
विधूतदैन्या कृतनागलीला ॥

अयस्कान्ता

अयस्कान्तसमाकृष्टो जीवाणुर्दृश्यतेऽधुना ।
सूक्ष्मतमः स्वयंपूर्णो (Bacteria) जीवविज्ञानपुङ्गवैः ॥१॥

वीक्षते पुरुषव्याघ्रो यदा कोमलकामिनीम् ।
वज्रादपि कठोरोऽपि भवेत्कुसुमकोमलः ॥ २ ॥

कामः प्रसूनास्त्र इति प्रसिद्धः
व्यकतीकृतं तेन हि तद्रहस्यम् ।
यदा पुमान् गच्छति चन्द्रलोकं
तदा मनस्तस्य प्रियाप्रसक्तम् ॥ ३ ॥

प्राणान् पुरुषवर्गस्य प्रसभं कर्षतीति सा
प्राणकान्ता भवेन्नारी यमादपि प्रभाविणी ॥ ४ ॥

अयस्कान्तगुणो नार्या अयस्कान्तोऽ बलागुणः ।
सुराणां गुरुणाद्यापि निर्णेतुं नैव शक्यते ॥ ५ ॥

स्त्रीसमानताष्टकम् ।

मुनीनां वचनं प्रायः 'न स्त्री स्वातन्त्र्यमर्हति' ।
हास्यास्पदं भवत्यद्य तदेवास्माभिरीरितम् ।।
न केवलं स्त्रियः सर्वाः स्वतन्त्रा भारतेऽधुना ।
समाः पुरुषवर्गेण सर्वविद्याविशारदाः ।।
समाप्तिं नीयते नूनं 'महिलावर्ष' संज्ञितः ।
समारम्भो जगत्यद्य घोषणादिविभूषितः ।

विमानयाने खलु बाष्पयाने
तैलादियानेषु विचित्रवेषाः ।
प्रयुक्तवैशिष्ट्यमयाधिकाराः
निरस्तनारीतरपौरवेषाः ।।

इत्थं

सर्वे समानतापेक्षि स्त्रीगणाः स्वाधिकारताम् ।
विमोक्तुं नैव वाञ्छन्ति परिशिष्टजना यथा ।।

उद्योगस्यावकाशेऽपि स्त्रीविशिष्टाधिकारता ।
पुरुषस्याभिलाषोऽद्य समानाधिकृतिं प्रति ।।

हरिः पुरारिश्चतुराननोऽपि
स्वकीयकान्तागृहकुम्भदासाः ।
नलादयः पाकगृहाधिकाराः
तेषां पुमानद्य नवावतारः ।।

स्त्रीप्रधाने समाजेऽस्मिन् राजकारणयन्त्रिते ।
दिवास्वप्नमिव स्मृत्वा वैभवं लभते सुखम् ।।

" देववाणी विजयताम् "

सर्वदेशीयभाषाणां मातृप्राया तु भारती ।
स्वात्मजादत्तसत्त्वेव वृद्धोत्सार्या न भारते ॥ १ ॥

कविश्रीकालिदासाद्यः काव्यग्रन्थैर्मनोहरैः ।
अलंकुर्वन्ति नित्यं यां ललनामिव भूषणैः ॥ ॥ २ ॥

धर्मदर्शनविज्ञानकलाविमलदीपिका ।
सुसंस्कृतिसदाचारसदानन्दविधायिका . ॥ ३ ॥

कति यूरोपविद्वांसः सुरवाणीं प्रशंसिरे ।
अवज्ञा भारतीयाणां स्वीयदारेषु या परा ॥ ४ ॥

परेषां काचमालोक्य अहो चकितचेतसाम् ।
विदेशे लब्धमूल्येन रत्नेनानन्दशून्यता ॥ ५ ॥

अवज्ञां भारतीया ये देववाण्याश्च कुर्वते ।
स्वकीयमूढतायास्ते आविस्कारं हि कुर्वते ॥ ६ ॥

कृत्वा यः संस्कृतोपेक्षां संस्कृतिं ज्ञातुमिच्छति ।
मूलाधारवि ना सोऽयं भवनं कर्तुमिच्छति ॥ ७ ॥

भाषाविवादवैविध्ये भारते ख्यातदर्शने ।
सर्वतारकभाषेयं जयेत्सुकृतदर्शना ॥ ८ ॥

महात्मा मार्गदर्शकः ।

नायं विशिष्टवपुषा जगति प्रसिद्धः
मल्लेषु याति गणनां न हि मोहनोऽद्य ।
संपूर्णलोकहृदये सुभागस्य राज्यं
यस्यास्ति नैतिकबलं भुवने स सिद्धः ॥ १ ॥

गुणानां ग्रहणे दक्षो दोषाणामपवर्जने ।
विमुखश्चात्मसौकर्ये रतः सकलरञ्जने ॥ २ ॥

कर्तव्यं लोककल्याणे साधनं चास्तु निर्मलम् ।
तेनेति कथितं पश्चात् प्रयुक्तं प्रथमं स्वयम् ॥ ३ ॥

श्रूयते कटिवद्धोऽभूत् बुद्धो जीविविमुक्तये ।
दृश्यमस्यार्धनग्नत्वं जनदारिद्र्यमुक्तये ॥ ४ ॥

विलासपूर्णेऽपि विचाररंके
कुतो भवे सत्यविशुद्धमूर्तिः ।
निवारिता मानसजातशका
प्रसारिता तेन स्वदेशकीर्तिः ॥ ५ ॥

धर्मदर्शनशून्येन राज्यकार्येण किं फलम् ।
सत्यागृहमयाद्युद्धात् नास्ति युक्तरं बलम् ॥ ६ ॥

तदीयादर्शवृन्दस्य व्यावहारिकजीवने
यथासाध्यमनुष्ठानं यशोगानं महात्मनः ॥ ७ ॥

गतः स येन मार्गेण तेनैव विश्वबन्धुता ।
यदिहास्ति तदन्यत्र, यन्नेहास्ति न कुत्रचित् ॥ ८ ॥

मांसमश्नाति वै गजः ।

'कानने स्वेच्छया मन्दं भ्रमन् शक्तियुतो गजः ।
शाकाहार्यपि नागेन्द्रः शक्तानामग्रणीः सदा' ॥ १ ॥
इयं सूक्तिः पुरा मान्या सापवादाऽधुना हि सा ।
क्वचित् मांसमश्नन्ति जिव्हाचापल्यतो गजाः ॥ २ ॥
विज्ञानपठ्यग्रन्थे यैः सुस्पष्टीकृतवानिदम् ।
अस्माभिरभिनन्द्योऽद्य सत्याविस्कारकार्यसौ ॥ ३ ॥
'धीरं विलोकयति चाटुशतैश्च भुङ्क्ते
वाक्यं कवेरपि पुनर्वितथं तदद्य ।
यत्सोऽपि जीविनिलये[2] गजपुंगवस्तु
हस्तस्य चालतमतः कुरुते विनीतः ॥ ४ ॥
पौरश्च कृतविद्योऽपि पशुवर्गशिरोमणिः ।
मानवः कुरुते नित्यं निषिद्धविधिपालनम् ॥ ५ ॥
धार्मिक. सज्जनश्चेति ख्यातो मद्यनिषेवणम् ।
रहस्यं सह मद्येन कुरुते कुलटारतः ॥ ६ ॥
सन्यासी मुक्तमोहादिः कामिनीकनकादिषु ।
रमते वीतरागोऽपि तेन कामो महाबलः ॥ ७ ॥
ब्रह्मचर्याश्रमे नूनं सर्वेऽपि विषयैषिणः ।
विकारहेतुसान्निध्ये को न कामवशं व्रजेत् ॥ ८ ॥
मांसाहारिणस्तावद् भक्तादिसेवने रताः ।
धार्मिकादिकृपापूर्णे देशे मांसोऽपि दुर्लभः ॥ ९ ॥
इत्थं जने जगति नीतिविरुद्धवृत्तौ
कामैकसाधनपरेऽहितधर्मनीतौ ।
नागो भुनक्ति बलवान् भुवि मांसमद्य,
'श्रेष्ठोऽनुगम्यत' इति प्रबला प्रवृत्तिः ॥ १० ॥

---

1 Ignatius Pinto. A Text Book of General Sciences P. 34
2 Zoo.

येषां केषां भवेत् सभा।

अध्यक्षश्चावदत्तावत् स्वयंसेवकमानिनम् ।
"सुरक्षा किं कृता सर्वा, बहिरन्तश्च यत्नतः" ॥ १ ॥

उवाच सेवकः शीघ्रं "यथासाध्यं महामते ।
अस्माभिर्या कृता रक्षा त्रिषु लोकेषु दुर्लभा ॥ २ ॥

हितशत्रुगणेनात्र प्रवेष्टुं नैव शक्यते ।
येऽप्यत्रायान्ति विघ्नाय पादपूजा व्यवस्थिता ॥ ३ ॥

सुसन्तुष्टोऽभवत्तस्य सभाध्यक्षः प्रभाववान् ।
उवाच मधुरं स्निग्धं प्रशंसन् दक्षसेवकम् ॥ ४ ॥

'समागमो यत्र समानदुःख–
सुपीडितानां प्रभुताडितानाम् ।
कृता सुरक्षा भवता सभायाः
परिश्रमः सार्थकतामुपैति ॥ ५ ॥

न चेत् सभा नोऽपि तथा समस्या–
पूर्णा भवेत् केन्द्रसभा यथैव ।
अवाञ्छितोपस्थितिना सदैव
अवान्तरो विघ्नमयः प्रभूतः ॥ ६ ॥

अयि सभ्याः सदा शान्तस्वभावेन सुमानसाः ।
सभिकैर्मानवैस्तुल्यं युष्माकं नैव वर्तनम् ॥ ७ ॥

इहागमनमस्माकं किमर्थं ? ज्ञातमेव तत् ।
अस्माकं प्रभवो नूनं वैरग्रहणबुद्धिना ॥ ॥ ८ ॥

पीडयन्ति सदा चास्मान् अकारणमयन्त्रिताः ।
तेषां निग्रहणे शक्ता भवितुमद्य समागताः ॥ ९ ॥

यो वा स्वामी प्रभुरिति मुहुर्गर्वयुक्तो मनुष्यः
अस्माभिः स क्वचिदपि महान् वर्तितुं नैव शक्तः ।
पीडादात्री भवति महती जन्मजन्मान्तराणां
पापानां हि परिणतिरहो मूकपाडास्मदीया ॥ १० ॥

शृण्वन्ते न कठोरा हि चास्मत्करुणदेवनम् ।
विजानन्ति कथं तेऽद्य पीडितानां मनःस्थितिम् ॥ ॥ ११ ॥

ज्ञायतेऽरसिकेनैव चास्माकं सुरभारती ।
व्यञ्जनाविमुखैर्मूढैः वाच्यार्थमात्रवेदिभिः' ॥ १२ ॥

श्रुत्वैतत्स्फूर्तिमद् वाक्यं रसिकाः श्रोतृपुङ्गवाः ।
करताडनमत्युच्चै चक्रुर्भीता दिवौकसः ॥ १३ ॥

स्फूर्तिमान् च सभाध्यक्षः उवाच पुनरेव तान् ।
करताडनमयी शंसा वक्तुरुद्रेककारिणी ॥ १४ ॥

'प्रभवो यदि दोषैकद्रष्टारः सन्ति सर्वशः ।
दर्शितु प्रभुतादर्प कथं (नो) भवतु जीवनम् ॥ १५ ॥

स्वामिनः स्वीयभार्याभिर्यदा ते कलहे रताः ।
तद्भीरूणां प्रतीकारमस्मत्ताडनतो भवेत् ॥ १६ ॥

क्षुधातृषाभ्यां च सुपीडितानां
अन्नं कथं नोऽस्तु सुताडितं तत् ।
अतोऽद्य संवीक्ष्य विचारशीलाः
तेषां प्रतीकाररता भवन्तु ॥ १७ ॥

समागतैरिहागत्य प्रभुभिः पीडितैः भृशम् ।
अविरोधमिमे सर्वे स्वीकर्तव्याश्च निर्णयाः' ॥ १८ ॥

सहर्षं च सहोद्गारं सभासद्भिः स याचितः ।
पठितुं प्रथमं पीडाः एकैकं रभते ततः ॥ १९ ॥

'चतुर्भिर्यन्नरैः शक्यं वोढुं भामतोऽधिकम् ।
एकैकोऽपि समर्थोऽस्ति वोढुमस्मद्गणे महान् ॥ २० ॥

मन्दया गतिना यावत् गच्छेत्तुष्टः क्रियारतः ।
त्वरान्वितोऽक्षमाशीलस्तं नु ताडयति प्रभुः ॥ २१ ॥

आत्मनो वञ्चनां ज्ञात्वा संभावयति मानवः ।
वञ्चनादियुतानस्मान् पलायनपरानिति ॥ २२ ॥

सोऽन्येषां वस्तुजातं हि हृत्वा रात्रौ पलायते ।
शङ्कमानस्ततः सर्वानस्मान् बध्नति रज्जुभिः ॥ २३ ॥

यो वाल्मीकिमुनेः शोकः श्लोकोऽभूदिति मन्यते
शोकश्लोकत्वमस्माकं सहते न विशालधीः ॥ २४ ॥

स्वेच्छाचारद्भवति मनुजः कण्टको विश्वशान्तेः
स्वातन्त्र्यं यद्ददति सहजं तत्स्वकीयाधिकारम् ।
अस्मद्दुःखं किमपि कुटिलो ज्ञातुमिच्छेन्न भीरुः
अन्येषां को जगति सहज मन्यते स्वाधिकारम् ॥ २५ ॥

सफलोऽन्यवञ्चते यावत् तावद्धर्षेण निर्भरः ।
निरर्थकं नरः किंचित् रागहीनं च गायति ॥ २६ ॥

प्रकृतेः सुन्दरं रूपं दृष्ट्वा सन्तुष्टमानसा ।
रागबद्ध मुदा सर्वे वयं गातुं च सार्थकम् ॥ २७ ॥

उपाक्रमामहे यावाज्जिव्हाबन्धस्तु नः कृतः
आत्मनः कर्णबन्धोऽपि तैरेवारसिकैस्ततः ॥ २८ ॥

कश्चिद्यदा मूर्खशिरोमणिर्नरः
अस्माभिरेवोपमितो भविष्यति ।
द्विषद्भिरेवात्मकुलं नराधमैः
कृतापमाना वयमेव साधवः' ॥ २९ ॥

श्रुत्वाध्यक्षवचः सर्वे रोषावेशवशं गताः ।
प्रशंस्योचुः पुनः प्राज्ञं सभाध्यक्षं सभासदः ॥ ३० ॥

'बूहि देव ! महाप्राज्ञ ! हितकारिशिरोमणे ।
निर्णयान् सकलान्च्चैः सर्वे वचसि ते स्थिताः' ॥ ३१ ॥

सभाध्यक्षोऽवदन्मन्दं तारस्वरसमन्वितः ।
समुद्र इव गंभीरो गर्जन् मेघ इवाम्बरे ॥ ३२ ॥

सन्तुष्टोऽहं विनयपरतां वः समीक्ष्याप्रमादं
संघर्षो वा भवति कलहो वापि दृश्यो नरेषु ।
ज्ञेयानेन प्रथमपदवीं संस्कृतिर्याधिरूढा
कोऽस्मिन् देशे कलहरहितः संगमो यज्जनानाम् ॥ ३३ ॥

एकैकशोऽधुना वच्मि निर्णयानविरोधतः ।
अंगीकृताश्च युस्माभिः सर्वे श्रुणुत बान्धवाः ॥ ३४ ॥

यदास्मान् ताडयेत् स्वामी मूढो मन्दगामिनः ।
दैवदत्तपदानां हि प्रयोगः क्रियतां पशौ ॥ ३५ ॥

ज्ञेयास्मकं सहजसुभगा भारती नापि तेन
वक्तुं शक्ता नहि कठिनया भाषया तस्य जन्तोः ।
यो वा भावो मनसि भविता तं न शक्ता हि वक्तुं
भूयोऽन्यस्मिन् प्रमुखसमये चर्चनीयं तदेतत् ॥ ३६ ॥

वाक्स्वातन्त्र्यं भवेन्नूनमस्माकमपि बान्धवाः ।
अपहर्तुं यदा स्वामी प्रयत्नं कुरुते नरः ॥ ३७ ॥

तारस्वरेण स्वातन्त्र्यं घोषितव्यं स्वकं तदा ।
मानवेष्वपि नेता स्याद्यस्य जिव्हास्वतन्त्रता ॥ ३८ ॥

अस्मासु योऽपि वा कोऽपि मूर्खो विधिवशाद्भवेत् ।
स नरणोपमीयेत मूर्खप्रतिनिधिर्नरः' ॥ ३९ ॥

परेद्युरेते रजकदिरासभा–
स्तैरेव बद्धा इति वृत्तपत्रे ।
पठन्महापौरगणः सुतुष्टो
न चेत् कुरूपो मलिनाम्बरैः स्यात् ॥ ४० ॥

वन्दे कविगुरुं सदा ।

न वन्दते कः कविसार्वभौमं
न यस्य सौन्दर्यकलाविरागः ।
असारकाव्येऽपि न यस्य रागो
वेदान्तसाराध्ययनेऽविरामः ॥ १ ॥

यदुक्तं प्रतिभावेशात्कविनानन्दचेतसा ।
जानाति रसिकः सर्वं तदावेशितचेतसा ॥ २ ॥

वेदवेदान्तशास्त्रेषु नास्ति यस्य परिश्रमः ।
काव्यपीयूषसंप्राप्तौ पाठकस्य वृथा श्रमः ॥ ३ ॥

शृंगार एव रसराजपदप्रतिष्ठामाप्नोति यत्कविगुरोः कवितावशेष्टः
सूच्योऽपि हरति सर्वसुहृन्मनांसि ग्राम्यादिदोषरहितो विमलस्वरूपः
॥ ४ ॥

कवीनां समयैः काव्यमस्य यद्यप्यलंकृतम् ।
निसर्गसहजा कान्तिर्मनोहरति संस्कृतम् ॥ ५ ॥

हंसः क्रीडन् कमलसुभगे मानसे तत्त्वसारे
पश्यन् यद्यत् नयनसचिरं कोमलं कर्बुरं च ।
धर्माचार्यप्रणतचरणो यः कविर्विश्ववेत्ता
नौम्यार्याणां परमरसिकं संस्कृतेः सारभूतम् ॥ ६ ॥

वाल्मीकिः ।

सरसः सरलश्चापि गंभीरोऽब्धिसन्निभः ।
निमज्जनबलं यस्यचयं रत्नानिलंभते सुधीः ॥ १ ॥

कविगुरोर्गुरुमव्याजं विस्मरेद्यदि पाठकः ।
विवेकानन्दसंतुष्टः तद्गुरुं विस्मरेदपि ।
(सुंदरं भवनं दृष्ट्वा मूलाधारं स्मरेत्कथम्) ॥ २ ॥

वाल्मीकिर्यदि नाभ्यस्तः शेषाभ्यासेन तेन किम् ।
वाल्मीकिर्यदि वाभ्यस्तः शेषाभ्यासेन तेन किम् ॥ ३ ॥

दुर्वृत्तचित्तपद्मेण निन्दिताभयदायिका
व्यक्ता वाल्मीकिचन्द्रेण रामवृत्तान्तचंद्रिका ॥ ४ ॥

दर्शितं चादिकाव्ये यन्नरश्चारित्र्यसयमी ।
सकलैः पूज्यते लोकैः नरमध्ये सुरोत्तमः ॥ ५ ॥

समाजधर्ममस्माभिः विस्मृतं कामचारिभिः ।
पुनर्भव स्मृतिं नेतुं महर्षे विश्वशान्तये ॥ ६ ॥

श्रीपरङ्डी मल्लिकार्जुन विरचितं ।

" नाचिकेतकथामृतम् । "

प्रथमः सर्गः ।

नमामि निर्मलं नित्यं जगदव्यक्तकारणम् ।
परब्रह्माभिधं तत्त्वमध्यासादिविकल्पितम् ॥ १ ॥

वेदान्ते मतभेदा ये क्व ते पांडित्यगोचराः ।
सहित्यादिसुधासिन्धुतटवासी क्व चाल्पधीः ॥ २ ॥

दर्शने शास्त्रसंग्रामे यस्य वाभिरुचिर्भवेत् ।
अध्यात्मादिपराकाष्ठां नाचिकेतकथां वदेत् ॥ ३ ॥

इति शंका भवेत् सूरिमानसे वीक्ष्य मत्कृतिम् ।
प्रांसुलभ्यं फलं नाहं कांक्षे साहित्यवामनः ॥ ४ ॥

अनेकजन्मनां पुण्यैर्निष्ठया परया युतः ।
नाचिकेतो यथा तत्त्वज्ञाने दृढव्रतोऽभवत् ॥ ५ ॥

तथैव महतां पुण्याः पठित्वा रोचकाः कथाः ।
पुण्यश्लोकस्य चारित्र्यचित्रणेऽस्मि कृतश्रमः ॥ ६ ॥

श्रद्धया गुरुभक्तत्या च स्थिरचित्तेन केवलम् ।
नाचिकेतो वरान् प्राप दुर्लभान् यमधर्मतः ॥ ७ ॥

सुकरं वक्तुमेतावत् तत्त्वज्ञानं तु दुष्करम् ।
मुक्तस्यापि कृतार्थः स्यां गुणादिकीर्तनेन वा ॥ ८ ॥

महतः पुण्यश्लोकस्य कीर्तने या भवेन्मतिः ।
मदीया भक्तियुक्तेयं सा भवेद् विदुषां मुदे ॥ ९ ॥

वेदान्तो भारतं चेति वृक्षावाश्रित्य यत्नतः ।
नाचिकेतकथापुष्पमालिका रचिता मया ॥ १० ॥

आगच्छन् मृगपोतेन नाचिकेतः स्वमाश्रमम् ।
स्निग्धस्वभावमधुरः शरीरेणातिकोमलः ॥ ११ ॥

जननीं लोककल्याणीं पृथिवीमिव मंगलाम् ।
नंदिनीसहितां दृष्ट्वा प्रसन्नवदनोऽभवत् ॥ १२ ॥

स्वभावकान्तिमान् चन्द्रः सुकान्तिः शरदागमे ।
कल्याणीवदनं तद्वत् पुत्रदर्शनशोभितम् ॥ १३ ॥

नंदिनी सोदरं ज्येष्ठं वीक्ष्य तं विश्वबान्धवम् ।
प्रसन्नेन दृगब्जेन स्नेहाविस्कारमातनोत् ॥ १४ ॥

तमाश्लिस्य सुतं माता श्रान्तं च वनचारिणम् ।
मृगानुरागिणं चैव बभाषे सुतवत्सला ॥ १५ ॥

पल्लवाभं शरीरं ते सूर्यातपपीडितम् ।
तथापि शोभते भूयो मित्रतापादिवांबुजम् ॥ १६ ।[1]

रक्षंस्त्वं मृगपोतादीन् पादपेभ्यो जलं ददन् ।
खिद्यसे लोकहेतोस्त्वं निरपेक्षः स्वयं सुखे ॥ १७ ॥

नंदिन्यपि विचिन्यैनं भ्रातरं श्रान्तमानसम् ।
वाण्या मधुरया श्रान्ति धुन्वतीव स्मिताननाः ॥ १८ ॥

'आहरामि फलानीह मधुराणि तवाधुना ।
सुधासमं जलं चैव क्षणं तिष्ठ सहोदर ! ॥ १९ ॥

---

1. कठोपनिषत् ।

कल्याणी वीक्षते यावत् सोदरस्नेहमेतयोः ।
सहर्षं च सगर्वं च ब्रवीत्येनां शुचिस्मितः ॥ २० ॥

'वाण्यैव मधुरया प्रीतश्चानया तव देवते ।
सुधारिच्यते वाचा निर्मलेन सहोदरि' ॥ २१ ॥

कल्याणी चाब्रवीत् पुत्रं स्नेहादाश्लिष्य तं पुनः ।
सहोदरीवचा तुष्टिश्चेदन्नदुर्गतिः कुतः ॥ २२ ॥

मृगराजमुखाः सर्वे स्वभावक्रूरजन्तवः
प्रसन्नवदना भूत्वा स्वागतं कुर्वते तव ॥ २३ ॥

अनेन तव कारुण्यं विश्वबन्धुत्वमेव च ।
सुव्यक्ते भवतो वत्स धन्या ते जननी यतः ॥ २४ ॥

त्वादृशं पुत्ररत्नं हि नरकात् त्रायते सदा ।
पितरौ केवलं नेमौ विश्वजन्तून् सुपीडितान् ॥ २५ ॥

ऋषीणां सत्कुले जातो ब्रह्मजिज्ञासुरेव च ।
उपेक्षितसुखो वत्स शारदां जीव वै शतम् ॥ २६ ॥

पानीयाहारभोगेऽपि यथा निरभिलाषिणा ।
भूतमद्य त्वया पुत्र, तथा वृद्धैर्न शक्यते ॥ २७ ॥

आत्मोद्धारं प्रति प्राज्ञैः प्रयत्नः क्रियते सदा ।
त्वया विश्वसुखायाद्य प्रयत्नः क्रियते सदा ॥ २८ ॥

मस्तके सूर्यतापादि सहित्वा पादपाः सदा ।
आश्रितेभ्यो ददत्येव च्छायां निर्वाणसन्निभाम् ॥ २९ ॥

मेघा वर्षन्ति निःस्वार्थं कर्तुं च सुफलां महीम् ।
सस्यादिश्यामलां चैव सज्जना अपि तादृशाः ॥ ३० ॥

मातुस्तद् वचनं श्रुत्वा प्रशंसापरमात्मनः ।
नाचिकेतोऽभवल्लज्जारंजितास्यः स्मितानन: ॥ ३१ ॥

अवदन् मातरं भूयो 'मा प्रशंस त्वमीदृशम् ।
अल्पबुद्धिमनौदार्यशालिनं मां दयानिधे ॥ ३२ ॥

पुण्यश्लोका: वव ते येषां वसुधैव कुटुम्बकम् ।
अहंकारविमूढात्मा मितशक्तिः क्वते सुतः ॥ ३३ ॥

तथापि तान् सतः पुर्वाननुकर्तुं यतिष्यते ।
यथाशक्ति स्वयं नित्यं तव पुण्येन वै बटुः ॥ ३४ ॥

इतीरयन्तं सुतमात्मतुष्टं जगद्धितार्थं व्रतधारिण तम् ।
सा प्रेमयुक्ता जननी विलोवय विनम्रबुद्धिं प्रशशंस भूयः ॥ ३५ ॥

इति प्रथमः सर्गः ।

द्वितीयः सर्गः ।

यदा कदा सात्त्विकवंशजातो रजोगुणासक्तमना मनुष्यः ।
वाजश्रवा यद्यपि नाचिकेतपिता पुनः रागमयो हि जातः ॥ १ ॥

कुले मुनीनामापि जन्म यस्य तस्याभवत्सत्त्वगुणे विरागः ।
नैतद्विचित्रं नियमोऽपवादयुतो भवेच्छास्त्रविदां मतेऽपि ॥ २ ॥

यदृच्छया लभ्यनिसर्गवस्तुजातेन संतुष्टिरतो हि यस्य ।
स एव योगक्षमतां लभेत अलभ्यकामस्य हि योगहानिः ॥ ३ ॥

वन्येन सन्तोषयुतो न भूत्वा भोगेषु भूपस्य कृतादरः सन् ।
यदाऽरुचिः स्वीयमखादिकार्ये तृष्णापराधीननरो ह्यशान्तः ॥ ४ ॥

यदाश्वसेनस्य नृपस्य भृत्या आनीतवन्तो विविधोपहारान् ।
भोगोचितान् तस्य मुनेः कुटीरे तदाभवन्मोदमयो महर्षिः ॥ ५ ॥

राजोपहारो यदि वर्णितुं तं राजोपजीवी कविरेव शक्तः ।
अभावपीडासमये वसन्तो वयं कथं वर्णशक्तिमन्तः ॥ ६ ॥

सुवर्णमुद्रा रजतादिपात्रैरुपाहृता रत्नमया प्रभूताः ।
पीताम्बराण्येव फलानि तत्र विरेजिरे भूरिवसूनि चैव ॥ ७ ॥

आकस्मिकेनैव नृपादरेण परं ययौ विस्मयमात्मतुष्टः ।
यावन्मुनिर्वक्तुमभूदशक्तस्तावद्भटा ऊचुरतीवशिष्टाः ॥ ८ ॥

'भवान् नृपस्यास्ति मुने पुरोधा भवन्निवासाय रमानिवासः ।
पाण्डित्यवैराग्यनिधे महर्षे यथार्हसन्मानमिदं गृहाण ॥ ९ ॥

सुवर्णरत्नादिमयीं हि शृंखलां विलोक्य मूढाः ससुखं विशिष्टाः ।
तया निबद्धा परिभूयमाना धन्या भवन्त्यैहिकलाभतुष्टाः ॥ १० ॥

अजेयषड्वर्गजयेन मानी यं तोषमायाति पुरा न तेन ।
नृपादरं वीक्ष्य तमेव धन्यः प्राप्नोति वैराग्यनिधिः प्रसिद्धः ॥ ११ ॥

सा मानिनी भर्तुरतीवमौढ्यं विलोक्य साध्वी परमेति दुःखम् ।
तथापि देवी निजशोकवेगं संयम्य भर्तरमुपैति छाया ॥ १२ ॥

वात्सल्यमूर्ति जननीं प्रयातां अनुप्रयातौ तनयौ विषण्णौ ।
प्रासादमासाद्य नरेन्द्रदत्तं त्रयीव तन्मूढमतिं विवेशुः ॥ १३ ॥

यथा यथा राजसुखाभिलाषी सुखं सिषेवे नृपवत् पुरोधाः ।
तथा तथा राजविलासवांछा विवर्धिताज्येन हुतो यथाग्निः ॥ १४ ॥

राजादरेणैव विमूढबुद्धिः अन्धीभवन् विस्मृतवेदसारः ।
वेदत्रयीभारमुवाह धीरो भारं सुवर्णस्य खरो यथार्तः ॥ १५ ॥

यदाश्वसेनस्य विशिष्टयागं वाजश्रवा भूरिधनं चकार ।
तदाभवत्तस्य हृदि प्ररूढा यागाविलाषा भुवि कीर्तिमाप्तुम् ॥ १६ ॥

ततोऽभवद्राजसुखे विरागः यदाभवद्यागयशोऽभिलाषी ।
यागक्रियादत्तमना मनस्वी विचिन्तितोऽभूत्सततं सरागः ॥ १७ ॥

यथावलं तत्परतामुपैति धनार्जने यागविशेषपूर्त्यै ।
अतन्द्रितः सन्निह कीर्तिकामी श्रियोऽपि मूलं खलु कार्यरक्तिः ॥ १८ ॥

स विश्वजिद्यागरतिर्महर्षिः स्पर्धी नृपेणैव समं तदाभूत् ।
उपकृतो येन दयालुनासौ निमन्त्रयामास महर्षिसंघम् ॥ १९ ॥

स दीक्षितो यागफलाभिलाषी यथाविधि स्वागतमाजहार ।
सन्तोषयामास धनेन सर्वान् समागतान् ब्राह्मणबन्धुवर्गान् ॥ २० ॥

तदाभवत्तस्य मनः सगर्वं दृष्ट्वात्मनो वैभवमल्पबुद्धिः ।
सहर्षमुद्दिश्य सभासदस्तान् वाजश्रवा नम्रतरो ह्युवाच ॥ २१ ॥

पुनीतमात्मानमतीवतुष्टः समागमाद्वो कृपयागतानाम् ।
मन्येऽधुना प्राज्ञतरा भवन्तो यागस्य कर्तरि इतो भवन्तु ॥ २२ ॥

यदेव सर्वं मम वित्तजातं प्रयासतः संचितमत्र तावत् ।
यज्ञार्थमेव प्रथमं मुनीन्द्रास्तदद्य सर्वं खलु युष्मदीयम् ॥ २३ ॥

कुलं पुनीतं भवतां समागमात् को वास्ति धन्यो भुवने मदन्यः ।
मदीययागस्य समाप्तिरार्या युस्माभिहालम्बत एव मान्या ॥ २४ ॥

प्रीणामि सर्वान् भवतो मुनीन्द्रा अनुग्रहं कर्तुमलं भवन्तः ।
आदाय सर्वं द्रविणं मदीयं देयौ भवद्भिः सुयशश्च नाकः ॥ २५ ॥

तस्य नैपुण्ययुक्तस्य वचसा मुदितास्तदा ।
प्रशशंसुः मुनिश्रेष्ठा वाजश्रवसमुत्तमम् ॥ २६ ॥

'विश्वजिद्यागकर्तारो भवन्त्येव नृपा भुवि ।
भवता नियमोः सोऽद्य सापवादः कृतो मुने ॥ २७ ॥

भवद्विज्ञापनातुष्टाः सर्वे ऋषिगणा वयम् ।
यज्ञपूर्तिं करिष्यामः स्वर्गकामी भवान् यतः ॥ २८ ॥

दीक्षावद्धोऽध्वरे सौम्य यजमानो भवानिह ।
सर्वोपकरणं सद्य आनेतव्यं यथाविधि ॥ २९ ॥

मुनिवरवरवाणीतोषितो विप्रवर्यः
सकलमखसमाप्तेर्वाञ्छयाकृष्टचित्तः ।
ऋषिगणपरितोषं चादधानो विनम्रः
भवति सुजनवन्द्यो धार्मिको वंचकोऽपि ॥ ३० ॥

इति द्वितीयः सर्गः ।

तृतीयः सर्गः ।

सकलमुनिगणैस्तैर्नीयमानासु गोषु
विमलमतियुतोऽयं नाचिकेतः कुमारः ।
बहुविधरुजिनाद्यैर्पीडितास्वेव तासु
कृशतनुजरठास्ताः वीक्ष्य दत्ताः स्वपित्रा ॥ १ ॥

परमशमविशिष्टः श्रद्धया चोदितः सन्
विफलमखविशेषं स्वं गुरुं दर्ययुक्तम् ।
गुरुतरपरिखेदैः पीड्यमानं विलोक्य
अमरपदसुलाभाकांक्षया चिन्तितं च ॥ २ ॥

स्वजनकहितकामी त्यक्तकामोऽपि साधुः
निखिलभुवनयोगक्षेमकार्यैकसक्तः ।
वदति विफलयागं 'तात कस्मै प्रदेय–
स्तव विनयविशिष्टश्चानुरक्तैकपुत्रः ? ॥ ३ ॥

विकसितसुमहीनैः निष्फलैः पादपैः किं ?
कृशतमतनुयुक्तैः कि फलं गोसहस्रैः ? ।
ददति मुनिवरेभ्यो यं पुनर्धेनुवृन्दं
असफलमखयोगास्ते व्रजन्त्यात्मनाशम्[2] ॥ ४ ॥

पुनरपि तनयोऽसौ पृच्छति स्वं गुरुं तं
तव नु तनयभूत मां ददात्यद्य कस्मै ?
इति तु सुतवचासौ क्रोधयुक्तो मुनिस्तं
वदति हि 'यमधर्मस्योपहारीकृतोऽसि'[3] ॥ ५ ॥

---

१. तं ह कुमारं सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश । कठ I
२. कठ I, 3
३. द्वितीयं तृतीयं तं होवाच मृत्यवे त्वा ददामीति । कठ I—4

कुपितजनकवाचा नाचिकेतोऽपि शान्तः
थाकपि परितुष्टं कर्तुकामोऽल्पबुद्धिम् ।
अभिलषति सुपुत्रो धर्मराजं समेत्य
सफलमखयुतं तं वीक्षितुं शान्तचित्तम् ॥ ६ ॥

अपगतपशुवृत्तिः क्रोधपूर्णोऽपि यावत्
परितपति पिता मे स्निग्धपुत्रो विरक्तः ।
इति विमलमतिस्तं सान्त्वनाश्वस्तचित्तं
अमर इव सुकान्तिः कर्तुमभ्युद्यतोऽभूत् ॥ ७ ॥

ध्रुवमिव मरणं यत् जीविराशेर्जगत्यां
जननमपि तथा स्यान्निश्चितं वै मृतानाम् ।
यमनगरमियासोर्मे न चिन्ता कदाचित्
जनक, विगतमोहं पीडयेन्मा भवन्तम् ॥ ८ ॥

मोहान्धभूतं पितरं समीक्ष्य
सुतः सुतेजा यमधर्मराजम् ।
गन्तुं यथाशीघ्रमितः प्रवृत्तः
ततो मुनिः शीघ्रतरं मुमोह ॥ ९ ॥

कृपावतोऽप्यस्य विनम्रमूर्ते-
मेनश्चचात्मरतस्य तस्य ।
तथापि मृत्योरतिथिः प्रसन्नः
शुचिस्मितो वै भवितुं प्रतस्थे ॥ १० ॥

यावन्निजः सुतवरो यमलोकगामी
माता तदस्य करुणापरिपूर्णचेताः ।
संयम्य शोकमतुलं तनय सुधीरं
आश्लिस्य गग्ददमिदं वचनं जगाद ॥ ११ ॥

गत्वा यमं निजबलेन विशुद्धसत्त्वः
कृत्वा कठोरमपि कोमलचित्तवृत्तिम् ।
आराध्य मुग्धमनसा निजतीक्ष्णबुद्ध्या
संप्राप्य काक्षितवरान् भव पितृभक्तः ॥ १२ ॥

नायासि पुत्र पुनरत्र यम प्रसाद्य
यावत् त्वदीयविरहे हतजीवितेयम् ।
तावत् तवापि जननी गतजीविते व
देहस्थिता भवति भूतलभारभूता ॥ १३ ॥

आगच्छ पुत्र शरदां शतमत्र जीव
लोके लभस्व यशसां निधिमत्यमूल्यम् ।
पूतं कुलं तव पितुः कुरु धैर्यशालिन्
श्रेयोऽस्तु विघ्नरहितस्तव चास्तु पन्थाः " ॥ १४ ॥

बालां सतीमपि सहोदरजीवभूतां
तां बोदरीं कुसुमकोमलगात्रयष्टिम् ।
शोकेन तप्तहृदयां गुरुणाश्रुपूर्णां–
मालिप्य गाढमवदत् स्थिरचित्तवृत्तिः ॥ १५ ॥

मा शोकतप्तहृदया भव देवि नित्यं
भ्राता तवाद्य विजयी भवितुं प्रयाति ।
प्रेयोविरक्तिरतिनाऽपि मया हि भद्रे
श्रेयोऽनुरक्तमनसा क्रियते प्रयत्नः ॥ १६ ॥

क्लिष्टैः व्रतैः पितरमद्य सुपीडितांगं
यागे च नष्टविभवं जननीं सुशीलाम् ।
शान्तात्मनेन्दुसुमुखी ननु रंजयेमौ
चंद्रस्य नूतनकला कुमुदं यथासौ ॥ १७ ॥

सेव्यौ त्वया सुतनु मत्पितरौ प्रयत्नात्
मद्विप्रलंभचकितौ बहुशोकतप्तौ ।
एकाक्षिहीनमनुजः सुतरां द्वितीये
बद्धादरो भवति यत् किमु तत्र चित्रम् ॥ १८ ॥

बालापि सा गुरुतरैः निजकृत्यकार्यैः
प्रौढा क्षणे भवति नूनमनिन्द्यगात्री ।
लोके विचित्रगतिरेव मनुष्यजातेः
खेलन्वटुर्भवति कार्यभरः क्षणार्धे ॥ १९ ॥

तानयं नाचिकेताख्यः स्थिरधीर्वटुसत्तमः ।
संत्यज्य बान्धवान्याति नगरं यमपालितम् ॥ २० ॥

इति तृतीयः सर्गः ।

चतुर्थः सर्गः ।

नाचिकेतो यदा यातः यमस्य सदनं महत् ।
यमराजो गतश्चासीदन्यत्र कार्यगौरवात् ॥ १ ॥

तस्य चोपविशन् द्वारे नाचिकेतो महावटुः ।
त्रिरात्रीस्त्रीण्यहान्येव चागमद्भूरितेजसा ॥ २ ॥

ब्रह्मबन्धुरयं विद्वान् महानंतिथिरेव च ।
ज्वलन् वैश्वानरो याज्ञः हविरिच्छुर्यथा स्थितः ॥ ३ ॥

निराहारो महातेजा आत्मशक्तियुतोऽतुलः ।
बालोऽपि जितषड्वर्गो न हेतुस्तेजसो वयः ॥ ४ ॥

निरसनात्तस्य बालस्य ज्वलदग्निनिभस्य च
विव्यथे यमलोकोऽपि यमपत्नी विशेषतः ॥ ५ ॥

अतिथिर्लोककल्याणकृतबुद्धिर्महाबलः ।
निराहारो भवेद्यत्र तत्र श्रेयोविमानता ॥ ६ ॥

कुठारो भववृक्षस्य त्यक्तकामो महायतिः ।
संगच्छेदतिथिर्यत्र सा भूमिर्भवति पावना ॥ ७ ॥

उपकाररताः लोके पादपा जलदास्तथा ।
नद्योऽतिथिविशेषाश्च केषां वन्द्या न ते स्युः ॥ ८ ॥

पुनरेव यदायति धर्मराजः स्वकं गृहम् ।
श्यामलां पतिहिते रक्ता मुवाच चिंतितस्तदा ॥ ९ ॥

अधिकारो मदीयो यः खेदाय वरवर्णिनि ।
नरकें पीड्यमानास्तु ते तुदन्त्यनिशं हि माम् ॥ १० ॥

सर्वे यदि महाभागाः पुण्यात्मनो भवन्ति चेत् ।
मदीयस्याधिकारस्य ह्यनावश्यकता भवेत्' ॥ ११ ॥

तदीयं वचनं चारु भिषजो नेत्रदानिनः ।
वचा तुल्यं भवेन्नूनं 'यदि नान्धः भिषक् कुतः' ॥ १२ ॥

तस्य तद्वचनं श्रुत्वा हर्षेणोत्फुल्लचक्षुषा ।
पश्यन्ती स्वं पतिं धन्यमुवाच मृदुभाषिणी ॥ १३ ॥

'स्वजीविकामपेक्षन्तः स्वार्थपूर्णा विचक्षणा ।
वैद्यराजा भवत्येव रोगिणां वृद्धिकांक्षिणः ॥ १४ ॥

धनप्राणान् हरन् वैद्यो भवता चोपमीयते ।
अप्रगूल्भैरनात्मज्ञैरयुक्तमिदमुच्यते ॥ १५ ॥

प्रस्तुतं श्रुणु जीवेश सर्वेऽपि त्रासिता यतः ।
वटुः कोऽपि दहत्यस्मान् निराहारव्रती पुनः ॥ १६ ॥

भवान् गच्छतु तत्रैव यत्रास्ति वटुपुंगवः ।
द्वार एव स्थितः सर्वान् भीषयन्नात्मतेजसा ॥ १७ ॥

यथा यथा वटुः साधुः निराहारस्तपस्यति ।
तथा तथैव पुण्यानि क्षीयन्ते धर्म ते पुरि ॥ १८ ॥

श्रुत्वा कलत्रवावयं तत् विहस्येदमुवाच च ।
'ज्ञातमेव मया पूर्वं तस्यागमनकारणम् ॥ १९ ॥

परीक्षितुं बलं तस्य गतोऽहमद्य सुन्दरि ।
प्रकृत्या कोमलः साधु परीक्षासमये कटुः ॥ २० ॥

आत्मशक्त्या गुरौ भक्त्या नारदानुग्रहेण च ।
नाचिकेतो महान् लोके भविस्यति वरानने ॥ २१ ॥

अधिकारदर्पिवत् चाहं वर्तिष्ये पदवीधरः ।
दर्शयिष्यामि लोकाय नाचिकेतात्यसंयमम् ॥ २२ ॥

त्वमेव गच्छ कल्याणि चानयाशु बटूत्तमम् ।
क्षुधया पीडितो मातुर्दर्शनेन गतक्लमः ॥ २३ ॥

आगतां मातर दिव्यां यमभार्यां कृपान्विताम् ।
हर्षातिरेकपूर्णेन चक्षुषा तां ददर्श स ॥ २४ ॥

तामेवानुजगामासौ गच्छन्तीं यमसन्निधिम् ।
धेनुं वत्सलतापुर्णां यथा वत्सो वनोत्सुकः ॥ २५ ॥

कान्त्यातिक्रम्य तेजांसि तृतीयाग्निमिवोत्थितम् ।
दृष्ट्वानन्दयुतो धर्मः मनस्येवमचिन्तयत् ॥ २६ ॥

'अहो मे ज्वलितो लोकस्तेजसास्य महात्मनः
आदित्यादीनि तेजांसि श्रीहतानि यतोऽभवन् ॥ २७ ॥

बालोऽपि ज्वलयते विश्वं बालभानुरिवापरः ।
तेजसा हि गरिष्ठा ये तेषु नो दृश्यते वयः' ॥ २८ ॥

पपृच्छ यमधर्मस्तु प्रांजलिं वीक्ष्य तं वटुम् ।
'बिभेषि यत् न किं वत्स सर्वलोकभयंकरात् ॥ २९ ॥

यतो दण्डधर. सर्वान् भीषयाम्यपराधिनः ।
सन्मार्गे युक्तदंडेन प्रजा नेतुं हि शक्यते' ॥ ३० ॥

नाचिकेत उवाचैनं सर्वलोकहितैषिणम् ।
भवान्नोऽस्ति पिता दक्षः प्रीतियुक्तो गुरुः पुनः ॥ ३१ ॥

चक्रधारी भवेद् दण्डधरो वापि जगत्पते ।
भवतो न बिभेम्यद्य भवद्भक्तः सुतो यतः ॥३२ ॥

तस्य तद्वचनेनायं धर्मराज उवाच तम् ।
प्रीतः प्रीतियुतं वाक्यं प्रसन्नतरया गिरा ॥ ३३ ॥

दिनत्रयं बहिःस्थित्वा निराहारोऽभवो वटो ।
वरत्रयं वृणीस्वाद्य प्रायश्चित्तमिदं मम ॥ ३४ ॥

तदीयवाक्यं श्रुतवान् यदासौ वटुर्बभूवातिविनम्रचेता ।
उवाच धर्मं मनसा दृढेन 'नाहं वणिक् लब्धुमितो वराणि' ॥ ३५ ॥

इति चतुर्थः सर्गः ।

पंचमः सर्गः ।

वाचं निशम्यास्य वटोः सकोप इव प्रसन्नोऽपि जगाद धर्मः ।
'कथं तिरस्कारमिदं कृतं मे वरत्रयस्याद्य वटो मदान्धः' ॥ १ ॥

वाचा न भीतो वटुरस्य शान्तो धर्मस्य कोपान्वितचेतसोऽपि ।
निवेदयामास विभुं विनीतः ह्यदीनसत्त्वः पुनरात्मदैवम् ॥ २ ॥

यदि प्रसन्नो मयि देवदेव न कांक्षयेऽतः परमद्य पूज्य ।
पितुः प्रसादादधिकं किमस्ति फलं वराणामपि धर्मराजः ॥ ३ ॥

प्रभो मदीयं हितमेव वीक्ष्य भवान् परीक्षापर इत्यवैमि ।
यतो हि लोके नवनीतमग्नौ तप्तं घृतं तद्भवितुं समर्थम् ॥ ४ ॥

कृपालुना मे भवता यदुक्तं वरप्रदानं प्रति सौम्यरूप ।
तिरस्कृतं तन्न मया हि देव, प्रसीद मे देसि वराणि ताहि ॥ ५ ॥

वरं वृणे तत्प्रथमं प्रशान्तः पिता भवेत् चापि विनीत मन्युः
त्वया विमुक्तं प्रति मानलप्रीत्या युतः स्यात् प्रविनष्टमोहः' ॥ ६ ॥

तदावदत्सोऽपि हसन् यमस्तं 'भवान् सुखं गच्छतु मत्प्रभुवतः ।
शान्तः स ते वीतविकारहेतुः पिताभिजानातु वरेण हि त्वाम्' ॥ ७ ॥

ततोऽब्रवीत्तं यमधर्मराजं वटूत्तमो वीतभयादिवर्गः ।
'श्रुतं मया देव, सुरेन्द्रलोके भवेन्न काचित् मरणादिभीतिः ॥ ८ ॥

अध्यापय स्वर्गहुताशविद्यां ययामृतत्वं भजते मनुष्यः ।
श्रद्धामयोऽहं पुरुषः प्रशान्तः याचे भवन्तं वरदं हि मृत्यो' ॥ ९ ॥

उवाच शान्तिर्न वचातितुष्टः दृशा पिबन् प्रीतियुजा प्रसन्नः ।
तदाभवत् प्रीतमना हि धर्मः बालप्रगल्भत्वमिदं विलोक्य ॥ १० ॥

स्वर्गीयवैश्वानरविद्यया यो अनुग्रहीतो भवितुँ सुपात्रम् ।
अनन्तलोकं प्रविशन् प्रतिष्ठां प्राप्नोति लोकेऽपि सुकीर्तिमेति ॥११॥

जानेऽग्निविद्यां निहितां गुहायां यथार्थतस्त्वामुपदेशयामि ।
विद्धि त्वमेनाममृतत्वहेतुं प्रीतोऽस्मि ते सौम्य चिरायं जीव ॥१२॥

तामग्निविद्यामुपदिश्य गूढां तं नाचिकेतं पुनरप्युवाच ।
तवैव नाम्ना भवितायमग्निर्लोके यशोभाग् भविता भवान् यत् ॥१३॥

यो नाचिकेताग्निविशुद्धविद्यां जानाति श्रद्धामयचित्तवृत्तिः ।
पाशं यमस्यापि पुरः प्रणोद्य विनष्टशोको दिवि नन्दतेऽसौ ॥१४॥

एतावदुक्त्वा विरते हि मृत्यौ वरं तृतीयं वरयेति चोक्तः ।
विचार्य धर्मं प्रति नम्रचित्तः स नाचिकेतः कथितुं प्रतस्थे ॥१५॥

प्रेते नरेऽस्तीति वदन्ति केचित् नास्तीति किंचित् प्रवदन्ति केचित् ।
तदात्मविद्यां भवतः प्रसादादध्येतुमिच्छामि वरान्तरेण ॥१६॥

ततो विचिन्त्याह यमो वटुं तं वरं गृहाणान्यमितोऽधिकं त्वम् ।
यतोऽत्र देवैरपि शक्तिमद्भिः चिकित्सिते नैव तदप्यलभ्यम् ॥१७॥

अनेन धर्मस्य वचाऽविमुग्धो वटुर्बभूवानिहठस्तृतीये ।
उवाच चैनं शिरसा प्रणम्य प्रसाद्य धर्मं विनयातिरेकात् ॥१८॥

न कोऽपि लोके भवता हि तुल्यो वक्ता भवेदात्मविशारदेन ।
न वा वरं किंचिदनेन तुल्यं वरेण मृत्यो वरयामि नान्यम् ॥१९॥

तदाभवत् चिन्तितमानसोऽसौ धर्मो बटोस्तस्य विनिश्चयेन ।
विलोभयन्नैहिककामजालैरुवाच धर्मो पुनरेव धीरम् ॥२०॥

कामा भवन्त्यत्र सुदुर्लभा ये ते सन्तु ते लभ्यतमा इहैव ।
तपस्विनोऽद्यापि तपोऽनुरक्ता भवन्ति येषां कृत एव सर्वे ॥२१॥

रामा इमा रम्यतमा पृथिव्यां शतायुषो ह्यौरसपुत्रपौत्राः ।
नवं वयो वारणमुख्यवाहा वित्तानि ते सन्तु वृणीस्व सौम्य ॥२२॥

प्रलोभनेनापि यमस्य धीमान् स्वकं वरं विस्मृतवान्न धीरः ।
शुचिस्मितस्तं वदति प्रजानन् विनश्वरत्वं खलु भौतिकानाम् ॥२३॥

न वित्तलाभो भविता सुखाय शतायुषा पुत्रगणेन वापि ।
वाहैर्नृपार्हैरपि वाजिवृन्दैर्न तर्पणीयो मनुजो महात्मन् ॥२४॥

त्वया गृहीतो मरणाधिदेव को वा भजेतेट्टशकामवन्दम् ।
मां शासितुं चार्हसि देवदेव निजात्मविद्यां सदयं दयालो ॥२५॥

प्रेयो यदायाति नरं सुधीरं श्रेयोभिलाषात् विजहति तत्स ।
मन्दो भवेल्लौकिकलाभतुष्टः प्रेयोऽभिलाषी भवितावदग्धः ॥२६॥

ततः परीक्ष्यैनममन्दबुद्धिं वटुं यमो युक्तियुतं सुशीलम् ।
उवाच संप्रीतमनाः पुनस्तं सुशिष्यलाभान्मुखरो गुरुः स्यात् ॥२७॥

जिज्ञासुरद्यैव मया हि लब्धो भवाट्टशो वीतभयः सुशीलः ।
अतः प्रसन्नोऽह्यभवं निजात्मविद्याप्रदानें मुदितो वटो ते ॥२८॥

तपस्विभिश्चापि कठोरचित्तैरलभ्यमस्त्येव यदद्य धीर ।
गूढातिगूढं शृणु चात्मतत्त्वं वदिस्यतो मे भवनाशहेतुं ॥२९॥

इत्थं प्रीतो विमलमतिना तेन बालेन सद्यः
धर्मस्तत्त्वं वदति सकलं चात्मविद्याप्रयुक्तम् ।
आत्मज्ञानाविमुखमतिभिर्ज्ञायते यत्स्वरूपं
सत्यं श्रुत्वा परममखिलं मोदतां मोक्षकामी ॥३०॥

पंचसर्गात्मकं काव्यमात्मनस्तुष्टये कृतम् ।
सन्तोऽपि यदि तुस्यन्ति ततो धन्यतरः कविः ॥३१॥

इति पञ्चमः सर्गः ।

—समाप्तमिदं काव्यम्—